

AS-001576
3

BOOK V.

THE

THE ASHTÁDHYÁYÍ OF PÁṆINI.

TRANSLATED INTO ENGLISH.

BY

SRISA CHANDRA VASU, B. A.,

Provincial Civil Service, N. W. P.

A9

Benares.

PUBLISHED BY SINDHU CHARAN BOSE,

at the Panini Office,

1897.

(All Rights Reserved.)



CSL

~~491.2~~



~~V32 A~~

Bks IV–VIII

491.25

Pan-A

Bks. 5-8

Pls. 17-32



CSL

TO

Hon'ble Sir John Edge, Kt., Q. C.,

CHIEF JUSTICE OF THE NORTH-WESTERN POVINCES,

THIS WORK

IS,

WITH HIS LORDSHIP'S PERMISSION,

AND IN RESPECTFUL APPRECIATION OF HIS LORDSHIP'S SERVICES TO THE CAUSE OF ADMINISTRATION OF JUSTICE AND OF EDUCATION

IN

THESE PROVINCES,

Dedicated

BY HIS LORDSHIP'S HUMBLE SERVANT

THE TRANSLATOR.

MINISTRY OF CULTURE · GOVERNMENT OF INDIA
सत्यमेव जयते
संस्कृति मंत्रालय · भारत सरकार

CSL

ओ३म् ।

अथ पञ्चमध्यायस्य प्रथमः पादः ।

BOOK FIFTH

CHAPTER FIRST

प्राक् क्रीताच्छः ॥ १ ॥ पदानि ॥ प्राक्, क्रीतात्, छः ॥

वृत्तिः ॥ तेन क्रीतमिति वक्ष्यति, प्रागितस्मात्क्रीतसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामश्छप्रत्ययस्तेष्वधिकृतो वेदितव्यः ।

1. From this one forward to 'tena-krîtam' V. 1. 37, the affix 'chha' bears rule.

The affix छ has the various senses taught in these thirty-seven sûtras V. 1. 1. to 37. Thus in the Sûtra तस्मैहितं 'suitable for that', V. 1. 5. the word छ must be read to complete the sense. Thus वत्सेभ्योहितो = वत्सीयो गोधुक्, करभीय उष्ट्रः, अकरभीयः, अवत्सीयः ॥ The limitation of the jurisdiction of छ has been indicated in the sûtra with regard to the meaning of the affix, and not with regard to the affix. As an affix, छ has no force beyond Sûtra 17, the affix ठञ् being the ruling affix thereafter.

उगवादिभ्यो यत् ॥ २ ॥ पदानि ॥ उ, गवादिभ्यः, यत् ॥

वृत्तिः ॥ प्राक् क्रीतादित्येव । उवर्णान्तात्प्रातिपदिकाद् गवादिभ्यश्च, यत्प्रत्ययो भवति, प्राक्क्रीतीयेष्वर्थेषु ।

2. The affix 'yat' comes after a prâtipadika ending with उ (long or short), and after the words गो and the rest, the senses of the affix being those taught upto Sûtra V. 1. 37.

The senses of Prâk-krîtîya affixes are three viz, those taught in sûtras V. 1. 5, V. 1. 12, and V. 1. 16. This यत् debars छ ॥ Thus शङ्कवे हितं = शङ्कु + यत् = शङ्कव्य (VI. 4. 146, VI. 1. 79). As शङ्कव्यं दारु, 'wood', 'fit for a stake' पिचव्यः कार्पासः॥ So also कमण्डलव्या मृत्तिका 'earth' lit. 'fit for a water-pot'.

So also after गवादि words, e. g. गव्यम् 'suitable for cows', हविष्यम् 'suitable for offering'.

The words सनङ्गुः meaning 'a kind of leather', and चरुः 'a kind of हविः offering', and सक्तुः 'a kind of food', all end in उ and are governed by this sûtra,

MINISTRY OF CULTURE · GOVERNMENT OF INDIA · सत्यमेव जयते · संस्कृति मंत्रालय · भारत सरकार

GL

in spite of V. I. 15 which applies especially to leathers, and V. I. 4 and its vârtika which applies especially to 'offerings' and 'food modifications'. This is an example where a subsequent sûtra does not debar a prior sûtra (I. 4. 2). Thus सनङ्गु + यत् = सनङ्गव्यं चर्म, 'leather fit for making Sanangu', चरु + यत् = चरव्या स्तण्डुलाः 'rice fit for making charu', सक्तु + यत् = सक्तव्या धानाः 'barley' fit for making Saktu'.

In the list of गवादि given hereunder, occurs नाभि नभं च, which means that नाभि is replaced by नभ when the affix यत् is added. Thus नाभये हितः = नभ्यः meaning अक्षः 'axis, axle' lit. 'fitted for the *nave* of the wheel'; or a wood fit to be made the nave of a wheel or अञ्जनम् the grease. When the word नाभि means 'navel' of a living being, then it will not take this यत्, but it will take the यत् of V. I. 6. In that case, नभ will not replace नाभि; e. g. नाभि + यत् = नाभ्यम् 'suitable for navel' i, e. oil.

The word श्वन् occurs in गवादि class. It takes samprasârana, व being changed to उ, and optionally this उ is lengthened; and the udâtta accent falls on the final. As श्वन् + यत् = शुन् + यत् = शुन्यम् or शून् + यत् = शून्यम् 'fit for a dog'. Contrary to VI. 4. 144, the न् of श्वन् is not elided before the taddhita affix यत् ॥

The word ऊधस् occurs in the गवादि class. Its final is replaced by अनङ्; e. g. ऊधस् + यत् = ऊध् + अन + य = ऊधन्यः कूपः 'a well'.

1 गो, 2 हविस्, 3 अक्षर, 4 विष, 5 बर्हिस्, 6 अष्टका, 7 स्वदा (स्वद), 8 युग, 9 मेधा, 10 स्रुच् (स्रक्), 11 नाभि नभं च, 12 शुनः संप्रसारणं वा च दीर्घत्वं तत्संनियोगेन चान्तोदात्तत्वम्, 13 ऊधसोऽनङ् च, 14 कूप*, 15 खद*, 16 दर (उदर), 17 खर, 18 असुर*, 19 अध्वन् (अध्वन; अध्वा) 20 क्षर*, 21 वेद*, 22 बीज*, 23 दीप्त* (दीस), 24 स्कन्द ॥

कम्बलाच्च संज्ञायाम् ॥ ३ ॥ पदानि ॥ कम्बलात्, च, संज्ञायाम् (यत्) ॥

वृत्तिः ॥ कम्बलात्प्राक्क्रीतीयेष्वर्थेषु यत्प्रत्ययो भवति, छस्यापवादः संज्ञायां विषये ॥

3. The affix यत् comes in the Prâk-krîtîya senses, after the word 'kambala', when a Name is meant.

This debars 'chha'. Thus कम्बल + यत् = कम्बल्यं 'A kambalya-measure of wool' = 100 Palas of wool. This is the name of a measure, such as कम्बल्यमूर्णा पलशतम् ॥

Why do we say संज्ञायां ? Observe कम्बलीया ऊर्णा "wool" lit. 'fit for making blanket', which is formed by छ ॥

विभाषा हविरपूपादिभ्यः ॥ ४ ॥ पदानि ॥ विभाषा, हविः, अपूपादिभ्यः (यत्)

वृत्तिः ॥ हविर्विशेषवाचिभ्यो ऽपूपादिभ्यश्च प्रातिपदिकेभ्यः प्राक्क्रीतीयेष्वर्थेषु विभाषा यत् प्रत्ययो भवति ॥

4. The affix यत् comes optionally after the words denoting 'offering,' and after apûpa &c, in the sense of Prak-kritîya.

Thus आमिक्ष्यं दधि, "fit for making आमिक्षा" i. e. curd :—or आमिक्षीयं with छ ॥ So also पुरोडाश्याः or पुरोडाशीया स्तण्डुलाः, 'suitable for making Purodâsa' i. e.

MINISTRY OF CULTURE · GOVERNMENT OF INDIA
CSL

a kind of rice. The word हवि occurs in the गवादि class (V. 1. 2) and it necessarily takes यत्, there being no option. The हवि here, therefore, means things denoting sacrificial offerings, and not the word-form 'havi.'

So also after अपूपादि, as, अपूप्यम् or अपूपीयं, तण्डुल्यम् or तण्डुलीयं ॥

1 अपूप, 2 तण्डुल, 3 अभ्यूष (अभ्युष), 4 अभ्योष, 5 अवोष, 6 अभ्येष, 7 पृथुक, 8 ओदन, 9 सूप, 10 पूप, 11 किण्व, 12 प्रदीप, 13 मुसल, 14 कटक, 15 कर्णवेष्टक, 16 इर्गल*, 17 अर्गल, 18 अन्नविकारेभ्यश्च, 19 यूप*, 20 स्थूणा, 21 दीप (पीप), 22 अश्व, 23 पत्र, 24 कट, 25 अयः स्थूण,

Vart :—The affix यत् comes optionally after words denoting modifications of food: such as सक्तु ॥ In the case of 'saktu' however, no of op tion is allowed. See V. 1. 2.

तस्मै हितम् ॥ ५ ॥ पदानि ॥ तस्मै, हितम् ॥

वृत्तिः ॥ तस्मादिति चतुर्थीसमर्थाद्धितमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति ॥

5. An affix comes after a word in the fourth case in construction, in the sense of 'good for that.'

Thus वत्सेभ्यो हितो गोधुक्=वत्सीयः 'fit for calves' i. e. a cow-milker. So अवत्सीयः, पटव्यम्, गव्यम्, हविष्यम्, अपूप्यम्, अपूपीयम् ॥

शरीरावयवाद्यत् ॥ ६ ॥ पदानि ॥ शरीर, अवयवात्, यत् ॥

वृत्तिः ॥ शरीरं प्राणिकायः । शरीरावयववाचिनः प्रातिपदिकाद्यत् प्रत्ययो भवति तस्मै हितमित्येतस्मिन्विषये । छस्यापवादः ॥

6. The affix यत् comes in the sense of 'good for that,' after a word denoting a part of the body.

The word शरीर means animal organism. This debars छ, thus, दन्त्यम् good for the teeth.' कण्ठ्यम्, ओष्ठ्यम्, नाभ्यम्, नस्यम् such as dentrifice, snuff, oil &c. See VI. 1. 213.

खलयवमाषतिलवृषब्रह्मणश्च ॥७॥ पदानि ॥ खल-यव-माष-तिल-वृष, ब्रह्मणः, च, (यत्)

वृत्तिः ॥ खलादिभ्यो यत्प्रत्ययो भवति तस्मै हितमित्येतस्मिन्विषये । छस्यापवादः ॥

7. The affix यत् comes in the sense of 'good for that,' after the word 'khala,' 'yava,' mâsha,' 'tila,' 'vṛisha' and 'brahmaṇ.'

This debars छ. Thus खल्यम् "suitable for threshing floor.' So also यव्यम्, माष्यम्, तिल्यम्, वृष्यम् and ब्रह्मण्यम् ॥

No secondary derivatives can, however, be formed of the following वृष्णे हितम्, ब्राह्मणेभ्यो हितम्; the full phrases must be used in these cases, for these words take neither छ nor यत् though वृष is=वृषन्, and ब्रह्मन् is=ब्राह्मण ॥

MINISTRY OF CULTURE · GOVERNMENT OF INDIA

GL

The word च in the sûtra indicates that the rule applies to words other than those enumerated. Thus रथाय हिता = रथ्या ॥

अजाविभ्यां थ्यन् ॥ ८ ॥ पदानि ॥ अज-अविभ्याम्, थ्यन् ॥

वृत्तिः ॥ अज अवि इत्येताभ्यां थ्यन् प्रत्ययो भवति तस्मै हितमित्येतस्मिन्विषये । छस्यापवादः ॥

8 The affix थ्यन् comes in the sense of 'good for that,' after the words 'aja' and 'avi.'

This debars 'chha.' Thus अजथ्या यूथिः 'the yellow jasmine called yûthi.' अविथ्या यूथिः ॥

आत्मन्विश्वजनभोगोत्तरपदात् खः ॥ ९ ॥ पदानि ॥ आत्मन्-विश्वजन, भोगोत्तर-पदात्, खः ॥

वृत्तिः ॥ आत्मन् विश्वजन इत्येताभ्यां भोगोत्तरपदाच्च प्रातिपदिकात्खः प्रत्ययो भवति तस्मै हितमित्येतस्मिन्विषये । छस्यापवादः ॥

वार्त्तिकम् ॥ पञ्चजनादुपसंख्यानम् ॥ वार्त्तिकम् ॥ सर्वजनाट्ठञ् खश्च ।

वा० ॥ महाजनान्नित्यं ठञ्वक्तव्यः ॥ वा० ॥ राजाचार्याभ्यांतु नित्यम् ॥

वा० ॥ आचार्यादणत्वं च ॥

9. The affix 'kha' comes in the sense of 'good for that,' after the words 'âtman,' and 'viśvajana' and after compounds having the word 'bhoga' as their second term.

This debars छ ॥ In the sûtra, the न् of आत्मन् has not been elided, indicating that it should not be compounded with the word भोग which would have been the case otherwise. It therefore follows from this irregular construction of the sûtra, that the word भोगोत्तरपद does not apply to the words आत्मन् and विश्वजन, but these words are themselves prakṛiti. Thus आत्मन् + ख = आत्मनीनम् 'suitable for ones self' the न् of âtman, which required to be elided by VI. 4. 144, is saved by VI. 4. 169. So also विश्वजनीनम् 'suitable for all men.' The word विश्वजन must be a karmadhâraya compound, meaning 'all men,' for the application of this rule; when it is a Tatpurusha or a Bahuvrîhi compound, it will take छ. As, विश्वजनाय हितं = विश्वजनीयम्, 'beneficial for man-kind.'

Vârt:—So also after Karmadhâraya Compound पंचजन, e. g. पंचजनीनम्, otherwise पञ्चजनीयम् ॥

Vârt:—After the Karmadharaya compound सर्वजन, there are the affixes ठञ् and ख, as, सर्वजनीनं, and सार्वजनिकम्; otherwise सर्वजनीयम् ॥

Vârt:—The affix ठञ् comes always after the word महाजन whether it be a Karmadhâraya or a Tatpurusha, but not so when it is a Bahuvrîhi Compound. As महाजनाय हितं = माहाजनिकं ॥ In a Bahuvrîhi it will be महाजनीयः with छ ॥

MINISTRY OF CULTURE · GOVERNMENT OF INDIA

Compounds having भोग as their final term, also take the affix ख, as, मातृभोगिणः and पितृभोगिणः ॥ The word भोग means 'body.' But मात्रीयः and पित्रीयः with छ, when the word भोग does not follow.

Vârt:—The words राजा and आचार्य followed by 'bhoga' take always the affix ख, as, राजभोगीनः and आचार्यभोगीनः ॥ In the case of आचार्यभोगीनः, the न is not changed into ण (VIII. 4. 2.) The words do not take the affix ख when used singly. As, राज्ञे हितम्, आचार्याय हितम्, no affix being employed.

सर्वपुरुषाभ्यां णढञौ ॥ १० ॥ पदानि ॥ सर्व-पुरुषाभ्याम्, ण-ढञौ ॥

वृत्तिः ॥ सर्वपुरुषाभ्यां यथासंख्यं णढञौ प्रत्ययौ भवतः तस्मै हितमित्येतस्मिन्विषये । छस्यापवादः ॥

वार्त्तिकम् ॥ सर्वाण्णस्य वा वचनम् ॥ वार्त्तिकम् ॥ पुरुषाद्वधविकारसमूहतेनकृतेष्विति वक्तव्यम् ॥

10. The affixes ण and ढञ् come in the sense of 'good for that' after the words 'sarva' and 'purusha'.

This debars 'chha'. Thus सर्वस्मै हितं = सार्वम् . So also पौरुषेयम् ॥

Vârt:—The affix ण comes optionally after सर्व, as, सर्वीयम् or सार्वम् ॥

Vârt:—The affix ढञ् comes after पुरुष when the word so formed means: 'slaughter', 'modification', 'a crowd', or 'made by him'. As पौरुषेयो वधः &c. 'man-slaughter', 'a crowd of men', 'human action', 'made by man'. e. g. पौरुषेयो ग्रन्थः 'a book written by man' contra. अपौरुषेया वेदाः 'The Vedas are non-human'.

माणवचरकाभ्यां खञ् ॥ ११ ॥ पदानि ॥ माणव-चरकाभ्याम्, खञ् ॥

वृत्तिः ॥ माणवचरकशब्दाभ्यां खञ् प्रत्ययो भवति तस्मै हितमित्येतस्मिन्विषये । छस्यापवादः ॥

11. The affix खञ् comes in the sense of 'good for that', after the words 'mâṇava', and 'charaka'.

This debars छ. As माणवाय हितं = माणवीनम्. So also चारकीणम् ॥

तदर्थं विकृतेः प्रकृतौ ॥ १२ ॥ पदानि ॥ तदर्थम्-विकृतेः, प्रकृतौ ॥

वृत्तिः ॥ प्रकृतिरुपादानकारणं, तस्यैव उत्तरमवस्थान्तरं विकृतिः । विकृतिवाचिनः प्रातिपदिकात्प्रकृतावभिधेयायां यथाविहितं प्रत्ययो भवति ॥

12. After a word being the name of a product, the above-mentioned affix comes, to denote a thing which is the primitive that is serviceable for that.

The word प्रकृति means 'primitive or the material cause of a product'. The word विकृति means 'the product' or 'modification of such primitive' तदर्थं 'serviceable for that' i. e. 'the primitive being serviceable for the product'. The word तदर्थं shows that the primitive must be serviceable for that particular product and nothing else. That is to say, an affix will not come to

MINISTRY OF CULTURE · GOVERNMENT OF INDIA

GSL

denote any product in general, but only when the primitive is serviceable for a particular product and nothing else. The word तदर्थं shows also that the word must be in the 4th case, when the affix is added. Some read the words तस्मै हितं also into this sûtra.

Thus अङ्गारेभ्यो हितानि एतानि काष्ठानि = अङ्गारीयाणि काष्ठानि 'wood serviceable for making charcoal;' so also प्राकारीया इष्टकाः 'bricks serviceable for making a wall'. Here अङ्गारीय and प्राकारीय are formed by छ V. I, 1. Similarly शङ्कव्यं दारु 'wood serviceable for a spear', पिचव्यः कार्पासः 'cotton plant serviceable for cotton'.

Why do we say तदर्थम् 'serviceable thereto'? Observe यवानां धानाः, धानानां सक्तवः ॥ Here there is modification of primitive, but सक्तु is the product also of other things than धानाः such as लाजा &c.

Why do we say विकृतेः 'after a product'? Observe उदकार्थः कूपः, there is no affix. For कूपः 'a well' and उदक 'water' do not stand in the relation of प्रकृति and विकृति i. e. material cause and effect. As 'water' is not the modification or product of 'the well', though it is found in the well, and therefore, the affix is not employed.

Why do we say प्रकृतौ 'to denote a primitive'. Observe अस्यर्था कोशी 'a sheath serviceable for a sword'. The sword is a product of iron, but a sheath is not the primitive of the sword.

By using the words प्रकृति and विकृति it is further shown that the prakriti is liable to modification or vikâra.

छदिरुपधिबलेर्ढञ् ॥ १३ ॥ पदानि ॥ छदि; उपधि, बलेः ढञ् ॥

वृत्तिः ॥ छदिरादिभ्यः शब्देभ्यो ढञ् प्रत्ययोभवति तदर्थं विकृतेः प्रकृतावित्येतस्मिन्विषये । छस्यापवादः ॥

13. The affix ढञ् (+/—एय) comes, in the sense of a primitive serviceable for a product, after the words 'chhadis', 'upadhi', and 'bali', denoting the product.

This debars छ. Thus छादिषेयाणि तृणानि, औपधेयं दारु, बालेयास्तण्डुलाः ॥

The affix comes after the word उपधि without changing the sense. उपधीयत इत्युपधिः = रथांगम् 'part of a wheel between the nave and the circumference or the wheel isteIf'. The word औपधेय also means the same.

ऋषभोपानहोर्ञ्यः ॥ १४ ॥ पदानि ॥ ऋषभ, उपानहोः ञ्यः ॥

वृत्तिः ॥ ऋषभ उपानह् इत्येताभ्यां ञ्यः प्रत्ययो भवति तदर्थं विकृतेः प्रकृतावित्येतस्मिन्विषये। छस्यापवादः ॥

14. The affix ञ्य (+/—य) comes, in the sense of a primitive serviceable for a product, after the words 'ṛishabha' and 'upânah' denoting the products.

MINISTRY OF CULTURE · GOVERNMENT OF INDIA · सत्यमेव जयते · संस्कृति मंत्रालय · भारत सरकार

GSL

Thus आर्षभ्यो वत्सः, औपानह्योः मुञ्जः ॥ This 'ñya' debars 'chha'. Even when the primitive is 'leather चर्म', the affix 'ñya' will come after उपानह् irregularly debarring अञ् of V. I. 15. Thus औपानह्यं चर्म ॥

चर्म्मणोञ् ॥ १५ ॥ पदानि ॥ चर्म्मणः, अञ् ॥

वृत्तिः ॥ चर्मण इति षष्ठी । चर्मणो या विकृतिः तद्वाचिनः प्रातिपदिकादञ् प्रत्ययो भवति तदर्थं विकृतेः प्रकृतावित्येतस्मिन्विषये । छस्यापवादः ॥

15. The affix अञ् ($\pm$/—अ) comes, in the sense of a primitive serviceable for a product, after a word expressing the product of leather.

The word चमणः in the aphorism is in the genitive case. This अञ् debars छ. Thus वार्द्ध्रं चर्म and वारत्रं चर्म a leather serviceable for making a 'vârdhra' and 'vârata' i. e. a leather thong.

तदस्य तदस्मिन्स्यादिति ॥ १६ ॥ पदानि ॥ तद्-अस्य, तद्-अस्मिन्, स्यात्, इति ॥

वृत्तिः ॥ तदिति प्रथमा समर्थविभक्तिः, अस्येति प्रत्ययार्थः, स्यादिति प्रकृतिविशेषणम् । इतिकरणो विवक्षार्थः । एवं द्वितीयेपि वाक्ये । सप्तम्यर्थे तु प्रत्यय इत्येतावान्विशेषः । प्रथमासमर्थात्षष्ठ्यर्थे सप्तम्यर्थे च यथाविहितं प्रत्ययो भवति । यत्तत्प्रथमासमर्थं स्याच्चेत्तद्भवति । इतिकरणस्ततश्चेद्विवक्षा ॥

16. The above mentioned affixes come after a word in the first case in construction, with the force of a genitive or a locative, when the word in the first case is agent of the verb 'syat';—in other words—the above-mentioned affixes have also the senses of 'very well sufficient there to' and 'very well sufficient to be made therein'.

The word तद् shows that the word in construction must be in the 1st case, the words अस्य 'of it' and अस्मिन् 'in it' show the senses of the affix, the word स्यात् 'it can be' qualifies the primitive, the word इति is for the sake of distinctness. Thus प्राकार आसाम् इष्टकानां स्यात् = प्राकारीया इष्टकाः 'the bricks sufficient to raise a wall'. So also प्रासादीयं दारु ॥ Similarly प्राकारोऽस्मिन्देशे स्यात् = प्राकारीयो देशः 'a place sufficient to make a wall therein'. प्रासादीया भूमिः ॥

The word स्यात् being in the Potential Mood (विधि लिङ्) of अस् 'to be,' has the force of संभावन 'potentiality, sufficiency' as given in Sûtras III. 3. 154 &c. Such as when the large number of bricks makes it *possible* to raise a wall, we say प्राकार आसामिष्टकानां स्यात् ॥ Similarly when the quality (गुण) of a land, such as its area, situation &c, makes it *possible* to erect a palace therein, we say, प्रासादो स्मिन्देशे स्यात् ॥

In the examples under this sûtra, there is no modification (विकार) of

MINISTRY OF CULTURE · GOVERNMENT OF INDIA

GL

the primitive (प्रकृति) into a product, as was the case under sûtra V. I. 12. The examples under this sûtra show merely the 'adequacy, fitness or sufficiency' of a thing for a certain purpose. Herein lies the difference between this sûtra and the previous ones.

The repetition of the word तद् twice in this sûtra shows the existence of this Grammatical maxim: अनेकस्मिन् प्रत्ययार्थे प्रत्येकं समर्थ विभक्तिः संबन्धनीयः 'when the sense of an affix is more than one, the case in construction to which the affix must be added must be shown in each case.'

Why there is no affixing in this case: प्रासादो देवदत्तस्य स्यात्? The use of इति in the Sûtra would prevent this, the force of इति being that the secular usage must be looked to in forming these derivatives.

परिखाया ढञ् ॥ १७ ॥ पदानि ॥ परिखायाः, ढञ् ॥

वृत्तिः ॥ परिखाशब्दाद् ढञ् प्रत्ययो भवति तदस्य तदस्मिन्स्यादित्येतस्मिन्नर्थे । छस्यापवादः ॥

17. The affix ढञ् (+/—एय) comes, after the word 'parikhâ' in the above senses of 'this is sufficient for that', and 'this is sufficient therein'.

This debars छ. Thus पारिखेयी भूमिः 'land sufficient to make a mote thereon'.

Up to this Sûtra was the governing force of the affixes छ and यत् ॥ Hereafter another affix will be taught.

प्राग्वतेष्ठञ् ॥ १८ ॥ पदानि ॥ प्राग्वतेः, ठञ् ॥

वृत्तिः ॥ तेन तुल्यं क्रिया चेद्वतिरिति वक्ष्यति । प्रागेतस्माद्वतिसंशब्दनाद्यानितऊर्ध्वमनुक्रमिष्यामः ठञ् प्रत्ययस्तेष्वधिकृतोवेदितव्यः ॥

18. Upto Sûtra V. 1. 115 (excluding that) the affix ठञ् (+/—इक or +/—क) bears rule.

The affix ठञ् governs all the succeeding sûtras upto तेन तुल्यं क्रिया चेद्वति, and has the senses given to it in Sûtras V. I. 37 &c. Strictly speaking the affix ठञ् governs only upto V. I. 110 and not upto 115. Thus in Sûtra 72, the affix ठञ् must be read. as पारायणिकः, तैरायणिकः, चान्द्रायणिकः ॥

आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् ॥ १९ ॥ पदानि ॥ आ-अर्हात्-अ-गो-पुच्छ-संख्या-परिमाणात् -ठक् ॥

वृत्तिः ॥ तदर्हतीति वक्ष्यति । आ एतस्मादर्हसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामः ठक् प्रत्ययस्तेष्वधिकृतो वेदितव्यः गोपुच्छादीन्वर्जयित्वा । अभिविधावयमाकारः तेनार्हत्यर्थेपि ठक् भवत्येव ॥

Kârikâ ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु सर्वतः ॥

MINISTRY OF CULTURE · GOVERNMENT OF INDIA

CSL

19. Upto Sûtra V. 1. 63, inclusive, the affix ठक् (±/—इकं or ±/—कं) bears rule, with the exception of the word 'gopuchchha', or a Numeral, or a word denoting a measure of capacity.

Strictly speaking ठक् governs upto sutra V. 1. 65. The word आर्हाद् is made up of आ + अर्हात्. The force of आ here is अभिविधि or inclusive, so that in the Sûtra तदर्हति (V. 1. 63) also, the ठक् will be employed. The affix ठक् debars ठञ् ॥ The sense will be the same as given in V. 1. 37 &c. the difference between ठक् and ठञ् being in accent only. Thus निष्कया क्रीतं = नैष्किकम्, So also पाणिकम् ॥

But गोपुच्छेन क्रीतम् = गौपुच्छिकम्, the accent falling on गौ; so also with words denoting Numbers and Measures, as षाष्टिकम्, प्रास्थिकम्, कौडविकम् ॥

The word परिमाण in this sûtra has its technical signification, and not its etymological sense. Technically परिमाण does not include संख्या, etymologically it does. Pâṇini has used this word परिमाण in some sûtras in its technical sense, in others in its etymological sense. Thus in sûtras IV. 1. 22, and V. 1. 19 the technical sense is taken, while in sûtras IV. 3. 156 and V. 1. 57 the etymological sense is meant. Technically परिमाण means सर्वतो मानं or a measure of capacity, and surface namely length and breadth and height or depth, such as प्रस्थः &c, i. e. a cubic measure and a square measure. In this sense it is to be distinguished from the measures of length or lineal measure, technically called प्रमाण, such as a वितस्त्य 'a cubit' &c, on the one side, and the measures of weight, technically called उन्माण such as पल, &c on the other side. In short उन्मान means a measure of weight or gravity, परिमाण means a measure of volume or capacity, प्रमाण means a lineal measure, and a संख्या is beyoud all these.

असमासे निष्कादिभ्यः ॥ २० ॥ पदानि ॥ असमासे-निष्कादिभ्यः (ठक्)

वृत्तिः ॥ आर्हादित्येव । निष्कादिभ्यः शब्देभ्यो ऽसमासे ठक् प्रत्ययो भवति आर्हीयेष्वर्थेषु । ठञोपवादः ॥

20. The affix ठक् comes after the words निष्क &c, when they are not parts of a compound, the sense of the affix being that taught in the subsequent sûtras upto V. 1. 63.

The word आर्हात् is understood in this sûtra also. This ठक् debars ठञ्. Thus नैष्किकम्, पाणिकम्, पादिकम्, माषिकम् ॥

Why do we say असमासे 'when not compounds'? Observe पैरमनैष्किकम्, ऊत्तमनैष्किकम् formed by ठञ् (V. 1. 18.) Compare VII. 3. 17 by which the Vṛiddhi of the second term takes place and not of the first.

Q. Is not the employment of the word असमासे in the Sûtra redundant? For by the maxim ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति "that which cannot

2

MINISTRY OF CULTURE · GOVERNMENT OF INDIA

GL

possibly be anything but a prâtipadika, does, contrary to I. 1. 72, not denote that which ends with it, but it denotes only itself;" the prâtipadika निष्क being especially mentioned in the sûtra, the rule will apply to the word निष्क and not to a word ending with निष्क ॥

A. The employment of the word असमासे in this Sûtra, indicates by implication (jñâpaka), that in spite of the above maxim, the तदन्तविधिः I. 1. 72 applies in the previous sûtras, while in the subsequent sûtras its does not. As उगवादिभ्यो यत् V. 1. 2, the यत् applies not only to गो &c but to words ending in गो &c. As गव्यम् and सुगव्यम्, अतिसुगव्यम् ॥ Not only अपूप्यम् अपूपीयम् V. 1. 4. but also यवापूप्यम्, यवापूपीयम् ॥ Not only हव्यम् V. 1. 6. but also राजहव्यम् ॥

While in the sûtras subsequent to this V. 1. 20, the tadanta-vidhi applies only to words preceded by a Sankhyâ and that also in Sûtras upto V. 1. 115 and not there after as, द्वैपारायणिकः and त्रैपारायणिक V. 1. 72. Even in this latter case, when an affix is elided by लुक् the tadanta vidhi does not apply. Thus द्वाभ्यां शूर्पाभ्यां क्रीतं = द्वि शूर्प + ठञ् V. 1 18 = द्विशूर्पम्, the affix being elided by V. 1. 28. Now in forming a tertiary derivative from this word द्विशूर्पम्, the tadanta vidhi will not apply. Thus द्विशूर्पेण क्रीतं, here what affix are we to subjoin? If tadanta-vidhi applied, we get the affix अञ् V. 1. 26 in the alternative. But tadanta-vidhi not applying, we get the general affix ठञ् V. 1. 8 and have द्वैशौर्पिकम् ॥ Here the affix ठञ् is not elided by V. 1. 28, as there is no Dvigu compounding. The above rule is summarised in the following *ishti* प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि ॥

The words 1. निष्क, 2. पण, 2. माष, 4. वाहद्रोण and 5. षाष्टि belong to निष्कादि class.

शताच्च ठन्यतावशते ॥ २१ ॥ पदानि ॥ शतात्, च, ठन्-यतौ, अशते ॥

वृत्तिः ॥ आर्हाद् इत्येव । शतशब्दात् ठन्यतौ प्रत्ययौ भवतः अशते ऽभिधेये । आर्हीयेष्वर्थेषु । कनोपवादः ।

21. The affixes ठन् (—/—इक) and यत् (—/य) come in the senses taught upto V. 1. 63 after the word शत, when it is not a part of a compound, and when it does not mean merely a 'hundred'.

The word आर्हात् V. 1. 19 is understood here also. These affixes ठन् and यत् debar the affix कन् V. 1. 22. Thus शतेन क्रीतम् = शत्यम् or शतिकम् 'purchased for a hundred gold coins'.

Why do we say अशते 'when not meaning merely 'a hundred'? Observe शतं परिमाणमस्य = शतकं निदानम् 'a band whose measure is hundred'. The word अशते qualifies the sense of the affix, and not that of the base, the latter not being possible; for the word शत as a base must always mean 'a hundred'. The following examples will illustrate the meaning; शतमध्यायाः परिमाणमस्य ग्रन्थस्य = शतकः 'a book con-

MINISTRY OF CULTURE · GOVERNMENT OF INDIA · सत्यमेव जयते · संस्कृति मंत्रालय · भारत सरकार
CSL

sisting of hundred Adhyayas'. In this case there is essentially no difference between the base (prakṛiti) and the sense of the affix (pratyayârtha), though there is apparent difference, for the sake of applying the affix. For शतकः is a book essentially consisting of hundred: while शत्यं 'a carriage purchased for a hundred coins', does not contain hundred as its essential part. Similarly शतकौ गोसंघः 'a herd of cows hundred in number'. Here the संघ: essentially consists of शत and so there is the affix कन् and not ठन् or यत् (V. 1. 58). But not so in the case of शत्यं शाटकशतं, शतिकं शाटकशतं, for here the sense of the affix is formed by the sentence, and not discovered merely from the word. Hence the following Vartika शतप्रतिषेधेऽन्यशतत्वेऽप्रतिषेधः ।

The word च in the sûtra draws in the word असमासे from the previous sûtra. Thus द्वौ च शतं च = द्विशतं, द्विशतेन क्रीतं = द्विशतकम् 'purchased for a hundred and two coins'. Here the affix is कन् V. 1. 22. So त्रिशतकम् ॥ According to the Ishṭi given in the last Sûtra, the tadanta vidhi applies here.

संख्याया अतिशदन्तायाः कन् ॥ २२ ॥ पदानि ॥ संख्यायाः,अतिशदन्तायाः,कन्॥

वृत्तिः ॥ आर्हादित्येव। संख्याया अत्यन्ताया अशदन्तायाश्च कन् प्रत्ययो भवति आर्हीयेष्वर्थेषु। ठञो ऽपवादः ।

22. The affix kan (― क) comes after a Numeral, when it does not end with ति or शत्, the sense of the affix being that taught hereafter upto V. 1. 63.

The word आर्हात् is to be read into this sûtra also. The word संख्या is defined in I. 1. 23. This कन् debars ठञ् ॥ Thus पंचभिः क्रीतः = पंचकः, बहुकः, गणकः ॥

Why do we say 'when it does not end in ति or शत्'? Observe साप्ततिकः, चात्वारिंशतकः formed by ठञ् ॥ But why कतिकः is formed by कन् and not by ठञ् or ठक्, as the word कति also ends in ति ? The word कति is formed by adding the affix डति, while the rule applies to the numerals which in their primitive state end with ति such as सप्ततिः, अशीतिः, विंशति &c. Here apply the two maxims अर्थवद्ग्रहणे नानर्थकस्य 'a combination of letters capable of expressing a meaning denotes whenever it is employed in Grammar, that combination of letters in so far as it possesses that meaning, but it does not denote the same combination of letters void of a meaning;' and निरनुबन्धक ग्रहणे न सानुबन्धकस्य 'when a term void of Anubandhas is employed in Grammar, it does not denote that which has an Anubandha attached to it'. Therefore when ति is taken, it does not mean डति ॥

वतोरिड् वा ॥ २३ ॥ पदानि ॥ वतोः, इट्, वा ॥

वृत्ति ॥ वत्वन्तस्य संख्यात्वात् कन् सिद्ध एव, तस्य त्वनेन वा इडागमो विधीयते। वतोः परस्य कनो वा इडागमो भवति आर्हीयेष्वर्थेषु ।

23. The affix 'Kan' coming after a Numeral end-

MINISTRY OF CULTURE · GOVERNMENT OF INDIA
861
GL

ing with वत्, takes optionally the augment इट्, the sense of the affix being those given upto V. 1. 63.

The words ending in वत् are संख्या; see I. 1. 23: and would consequently take कन् by V. 1. 22. The present sûtra ordains the optional affixing of इट् to this कन् ॥ Thus तावत्कः or तावतिकः, यावतिकः or यावत्कः ॥

विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम् ॥ २४ ॥ पदानि ॥ विंशति-त्रिंशतभ्याम्-ड्वुन्-असंज्ञायाम् ॥

वृत्तिः ॥ विंशतित्रिंशद्भ्यां ड्वुन् प्रत्ययो भवति असंज्ञायां विषये आर्हीयेष्वर्थेषु ।

24. The affix ड्वुन् (⊥ — अक) comes in the senses taught upto V. 1. 63, after the words 'Vinśati' and 'trinśat', when it does not denote a Name: the ति and अत् of the base being dropped before this affix.

Thus विंशति + ड्वुन् = विंश + अक (VI. 4. 142) = विंशकः; त्रिंशत् + ड्वुन् = त्रिंश् + अक (VI. 4. 143) = त्रिंशकः ॥

Why do we say असंज्ञायाम् 'when not denoting a Name'? Observe, विंशतिकः, त्रिंशत्कः formed by affix कन् V. 1. 22. Q. Why do you affix कन्, when it is prohibited by the phrase अतिशदन्तायाः; for विंशति ends in ति and त्रिंशत् ends in शत्? The affix कन् will be added by dividing the sûtra into two: viz: (1) विंशतित्रिंशद्भ्यां (2) ड्वुनसंज्ञायाम्; the meanings being (1) The affix 'Kan' is added to vinśati and trinśat; (2) The affix ḍvun is added to the same words, when not denoting a name.

कंसाट्टिठन् ॥ २५ ॥ पदानि ॥ कंसात्-टिठन् ॥

वृत्तिः ॥ कंसाट्टिठन् प्रत्ययो भवति आर्हीयेष्वर्थेषु । ठञोऽपवादः ।

वार्त्तिकम् ॥ अर्द्धाच्चेति वक्तव्यम् ॥ वा० ॥ कार्षापणाट्टिठन्वक्तव्यः ॥

वा० ॥ प्रतिशब्दश्चास्यादेशो वा वक्तव्यः ॥

25 The affix टिठन् (⊥ — इक) comes in the senses taught upto V. 1. 63, after the word कंस ॥

This debars ठञ्; the anubandha टि of टिठन् shows that the feminine of the word will be formed by ङीप् (IV. 1. 15), the इ of टि is for the sake of pronunciation, the न् of टिठन् is for accent (VI. 1. 197). Thus कंसिकः fem. कंसिकी ॥

Vârt:—So also it must be stated after the word अर्ध; e. g. अर्धिकः, अर्धिकी ॥

Vârt:—So also after the word कार्षापण, e. g. कार्षापणिकः fem. कार्षापणिकी ॥ Sometimes the word प्रति is substituted for कार्षापण before this affix, as, प्रतिकः fem. प्रतिकी ॥

MINISTRY OF CULTURE · GOVERNMENT OF INDIA

GL

शूर्पादञन्यतरस्याम् ॥ २६ ॥ पदानि ॥ शूर्पात्, अञ्, अन्यतरस्याम् ॥

वृत्तिः ॥ शूर्पशब्दादन्यतरस्यामञ् प्रत्ययो भवति आर्हीयेष्वर्थेषु । ठञोपवादः ॥ पक्षे सोपि भवति ।

26. The affix अञ् (±′—अ) comes optionally in the senses taught upto VI. 1. 63, after the word 'śûrpa'.

This debars ठञ् which comes in the alternative. As, शूर्पेण क्रीतं = शौर्पम् or शौर्पिकम् ॥

शतमानविंशतिकसहस्रवसनादण् ॥ २७ ॥ पदानि ॥ शतमान-विंशतिक-सहस्र-वसनात्-अण् ॥

वृत्तिः ॥ शतमानादिभ्यः शब्देभ्यो ऽण् प्रत्ययो भवति आर्हीयेष्वर्थेषु । ठक्ठञ्कनामपवादः ।

27. The affix अण् (±—अ) comes in the senses taught upto V. 1. 63, after the words 'śatamâna', 'vinśatika', 'sahasra', and 'vasana'.

This debars ठञ्, ठक् and कन् ॥ Thus शतमानेन क्रीतं = शातमानं so also वैंशतिकम् साहस्रम् and वासनम् ॥

अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायाम् ॥ २८ ॥ पदानि ॥ अध्यर्द्ध-पूर्व-द्विगोः, लुक्, असंज्ञायाम् ॥

वृत्तिः ॥ आर्हादित्येव । अध्यर्द्धशब्दः पूर्वो यस्मिन्तस्मादध्यर्द्धपूर्वात्प्रातिपदिकाद् द्विगोश्च परस्य आर्हीयस्य लुग् भवति, असंज्ञायां विषये ।

28. The affix having the senses taught upto V.1.63, is elided by लुक्, after a stem beginning with the word adhyardha, and after a Dvigu compound, when it is not a Name.

The word आर्हात् is understood here also. Thus अध्यर्द्धकंसम्, द्विकंसम्, अध्यर्द्धशूर्पम्, द्विशूर्पम्, त्रिकंसम्, त्रिशूर्पम् ॥ Here the affixes टिठन् and अञ् are elided.

Though in the words द्विशूर्पम् &c. the affix is elided, it is only so when the affixing of the taddhita occasions a Dvigu compounding (II. 1. 51) such as in द्वाभ्यां शूर्पाभ्यां क्रीतं = द्विशूर्पम् ॥ Here the resultant is a Dvigu compound. But in forming tertiary derivatives the affix is not elided, as द्विशूर्पेण क्रीतं = द्विशौर्पिकम् ॥ Hence the following rule: द्विगोर्लुकि तन्निमित्तग्रहणम् ॥ See IV. 1. 88, V. 1. 20. ॥

Why do we say असंज्ञायाम् 'when not a Name'? Observe पांचलोहितिकम् or पंचलौहितिकम् and पांचकलापिकम् being names of certain measures. The feminine word लोहिनी is changed into the masculine by the Vârtika भस्याढे तद्धिते given under VI. 3. 35.

The word अध्यर्द्ध is a Sankhyâ (See I. 1. 23), and a word beginning with it will be a Dvigu compound. Its separate mention in this sûtra may appear superfluous. It is however so mentioned, in order to indicate (jñâpaka) that

MINISTRY OF CULTURE · GOVERNMENT OF INDIA

GSL

this word is not always a Sankhyâ. Thus for the purposes of the application of the affix कृत्वसुच् (V. 4. 17), this word is not a sankhyâ.

विभाषा कार्षापणसहस्राभ्याम् ॥ २९ ॥ पदानि ॥ विभाषा, कार्षापण, सहस्राभ्याम्, (लुक्) ॥

वृत्तिः ॥ अध्यर्द्धपूर्वाद् द्विगोश्च कार्षापणसहस्रान्तादुत्तरस्यार्हीयप्रत्ययस्य विभाषा लुग्भवति ।

वा० ॥ सुवर्णशतमानयोरुपसंख्यानम् ॥

29. The affix having the senses taught up to V. 1. 63 is optionally luk-elided, after the words kârshâpaṇa, and sahasra, when they are preceded by adhyardha or are members of a Dvigu compound.

This sûtra makes the elision optional, when it was compulsory by the last sûtra. Thus अध्यर्द्धकार्षापणम् or अध्यर्द्धकार्षापणिकं, द्विकार्षापणम् or द्विकार्षापणिकम्, here the affix टिठन् (V. 1. 25) is elided in one case, and not elided in the other. When it is not elided, प्रति may be substituted for कार्षापण (V. 1. 25). अध्यर्द्धप्रतिकम्, द्विप्रतिकम् ॥

So also after the word सहस्र, e. g. अध्यर्द्धसहस्रम् or अध्यर्द्धसाहस्रम्, द्विसहस्रम् or द्विसाहस्रम् ॥ When the affix is not elided, the forms above shown with irregular Vṛiddhi of the second stem, are evolved by sûtra VII. 3. 15.

Vârt:—The words सुवर्ण and शतमान should also be enumerated. As, अध्यर्द्धसुवर्णम् or अध्यर्द्धसौवर्णिकम्, द्विसुवर्णम्, द्विसौवर्णिकम्, अध्यर्द्धशतमानम्, अध्यर्द्धशातमानम्, द्विशतमान or द्विशातमानम् ॥ The irregular Vṛiddhi of the second term takes place by VII. 3. 17.

द्वित्रिपूर्वान्निष्कात् ॥ ३० ॥ पदानि ॥ द्वि, त्रि, पूर्वात्, निष्कात्, (लुक्) ॥

वृत्तिः ॥ द्विगोरित्येव । द्वित्रिपूर्वाद् द्विगोर्निष्कान्तादार्हीयप्रत्ययस्य विभाषा लुग्भवति ।

वा० ॥ बहुपूर्वाच्चेति वक्तव्यम् ॥

30. The Ârhîya-affix (V. 1. 63) is optionally elided after a Dvigu occasioning compound, of the word nishka, preceded by dvi and tri.

The word द्विगोः 'a taddhita occasioning a Dvigu compound' of V. 1. 28 is to be read into this sûtra. Thus द्विनिष्कम् or द्विनैष्किकम्, त्रिनिष्कम् or त्रिनैष्किकम् (VII. 3. 17).

Vârt:—So also when nishka is preceded by बहु, e. g. बहुनिष्कम् or बहुनैष्किकम् ॥ The irregular Vṛiddhi of the second term is caused by VII. 3. 17.

बिस्ताच्च ॥ ३१ ॥ पदानि ॥ बिस्तात्-च (लुक्) ॥

वृत्तिः ॥ द्वित्रिपूर्वादिति चकारेणानुकृष्यते, द्वित्रिपूर्वाद्बिस्तान्ताद्द्विगोः परस्यार्हीयप्रत्ययस्य विभाषा लुग्भवति ।

31. The ârhîya-affix (V. 1. 37-63) occasioning a

MINISTRY OF CULTURE · GOVERNMENT OF INDIA

GSL

Dvigu compound, is optionally elided after the word bista, preceded by dvi or tri.

The word च in the sûtra draws in the words द्वित्रिपूर्वात् ॥ Thus द्विबिस्तम् or द्विबैस्तिकम्, त्रिबिस्तम् or त्रिबैस्तिकम्, बहुबिस्तम्, बहुबैस्तिकम् ॥

The separation of this sûtra is for the sake of the subsequent sûtra.

विंशतिकात्खः ॥ ३२ ॥ पदानि ॥ विंशतिकात्-खः ॥

वृत्तिः ॥ अध्यर्द्धपूर्वात्प्रातिपदिकाद्दिगोश्च विंशतिकशब्दान्तादार्हीयेष्वर्थेषु खः प्रत्ययो भवति ॥

32. The affix kha (ईन) comes in the ârhîya senses (V. 1. 37-63) after the word viṅśatika, when preceded by the word adhyarddha or a Numeral, occasioning a Dvigu.

Thus अध्यर्द्धविंशतिकीनम्, द्विविंशतिकीनम् and त्रिविंशतिकीनम् ॥ Being especially ordained, this affix ख is not elided by V. 1. 28.

खार्या ईकन् ॥ ३३ ॥ पदानि ॥ खर्य्याः, ईकन् ॥

वृत्तिः ॥ अध्यर्द्धपूर्व्वाद् द्विगोरित्येव । अध्यर्द्धपूर्वात्प्रातिपदिकाद् द्विगोश्च खारीशब्दान्तादार्हीयेष्वर्थेषु ईकन् प्रत्ययो भवति ॥

वार्त्तिकम् ॥ केवलाच्चेति वक्तव्यम् ॥ वा० ॥ काकिण्याश्चोपसंख्यानम् ॥ वा० ॥ केवलायाश्च ॥

33. The affix îkan (ˊ—ईक) comes in the Ârhîya senses (V. 1. 37-63), after the word khârî, when preceded by the word adhyardha or a Numeral occasioning a Dvigu.

Thus अध्यर्द्धखारीकम्, द्विखारीकम् ॥

Vârt :—So also after the word खारी alone, as खारीकम् ॥

Vârt :—So also after the word काकिणी, as, अध्यर्द्धकाकिणीकम्; द्विकाकिणीकम्, त्रिकाकिणीकम् ॥ So also when the word is alone : as, काकिणीकम् ॥

पणपादमाषशताद्यत् ॥ ३४ ॥ पदानि ॥ पण-पाद-माष-शतात्, यत् ॥

वृत्तिः ॥ अध्यर्द्धपूर्वाद् द्विगोरित्येव । अध्यर्द्धपूर्वाद् द्विगोश्च पणपादमाषशतशब्दान्तादार्हीयेष्वर्थेषु यत् प्रत्ययो भवति ।

34. The affix yat (य) comes in the ârhîya senses (V. 1. 37-63), after the words paṇa, pâda, mâsha and ṣata, when preceded by the word adhyardha, or a Numeral occasioning a Dvigu.

Thus अध्यर्द्धपण्यम्, द्विपण्यम्, त्रिपण्यम् so also अध्यर्द्धपाद्यम्, द्विपाद्यम्, त्रिपाद्यम् ॥ Here पाद is not changed into पद, by VI. 3. 53. The substitution enjoined by VI. 3. 53 takes place when पाद means the *foot* of a living being, while here it means a measure of capacity. So also अध्यर्द्धमाष्यम्, द्विमाष्यम्, त्रिमाष्यम्, अध्यर्द्धशत्यम्, द्विशत्यम्, त्रिशत्यम् ॥

MINISTRY OF CULTURE · GOVERNMENT OF INDIA
संस्कृति मंत्रालय · भारत सरकार

GL

शाणाद्वा ॥ ३५ ॥ पदानि ॥ शाणात्-वा (यत्) ॥

वृत्तिः ॥ अध्यर्द्धपूर्वाद्द्विगोरित्येव । शाणशब्दादध्यर्द्धपूर्वाद् द्विगोरार्हीयेष्वर्थेषु वा यत् प्रत्ययो भवति । ठञोऽपवादः । पक्षे सोऽपि भवति ।

वार्त्तिकम् ॥ शताच्चेति वक्तव्यम् ॥

35. The affix yat comes optionally after the word śâṇa, in the ârhîya-senses (V. 1. 63), when it is preceded by the word adhyardha or a Numeral occasioning a Dvigu.

This debars ठञ which also comes in the alternative, and is then elided by V, 1. 28. Thus अध्यर्द्धशाण्यम् or अध्यर्द्धशाणम्, द्विशाण्यम् or द्विशाणम्, त्रिशाण्यम् or त्रिशाणम् ॥

Vârt:—So also optionally after the word शत, as, अध्यर्द्धशत्यम् or °शतम्, द्विशत्यम् or °शतम्, त्रिशत्यम् or °शतम् ॥

द्वित्रिपूर्वादण्च ॥ ३६ ॥ पदानि ॥ द्वि त्रि-पूर्वात्, अण्, च ॥

वृत्तिः ॥ शाणादित्येव, द्वित्रिपूर्वाच्छाणान्तात्प्रातिपदिकादार्हीयेष्वर्थेषु अण् प्रत्ययो भवति, चकाराद्यच्च वा ।

36. The affix aṇ (±—अ) as well as 'yat' optionally also comes after the word śâṇa, in the ârhîya-senses (V. 1. 37-63), when preceded by the words द्वि and त्रि.

The यत् comes optionally by the last sûtra and is also drawn into this by the word च. Thus we have three forms, द्विशाण्यम्, द्वैशाणम्, and द्विशाणम्, so also त्रिशाण्यम्, त्रैशाणम् and त्रिशाणम् ॥

The irregular Vṛiddhi of the second term in cases of compounds of numerals, taught in VII. 3. 15-17, does not however take place in the case of शाण, this word being especially excluded from the operation of those rules, see VII. 3. 17. The Vṛiddhi here is regular as taught by the general rule VII. 2. 117.

तेन क्रीतम् ॥ ३७ ॥ पदानि ॥ तेन-क्रीतम् ॥

वृत्तिः ॥ ठञादयस्त्रयोदश प्रत्ययाः प्रकृताः तेषामितः प्रभृति समर्थविभक्तयः प्रत्ययार्थाश्च निर्दिश्यन्ते॥तेनेति तृतीयासमर्थात् क्रीतमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति ॥

37. The thirteen affixes taught in V. 1. 18-36, have the sense of "purchased with this price", and are added to a word in the third case in construction.

The thirteen affixes ठञ्, ठक्, ठन्, यत्, कन्, इठुन्, टिठन्, अञ्, अण्, ख, ईकन्, यत् and अण् have already been taught. Now is taught their sense, and the case in construction of the word to which they should be added. The तेन shows that the word must be in the 3rd case in construction : and क्रीतम् shows that the sense is that of 'purchased'. The illustrations have already been given in the previous sûtras. Some more may be mentioned here. Thus सप्तत्या क्रीतं = साप्ततिकम्, आशीतिकम्, नैष्किकम्, पाणिकम्, पादिकम्, माषिकम्, शत्यम्, शतिकम्, द्विकम्, त्रिकम् &c.

MINISTRY OF CULTURE · GOVERNMENT OF INDIA

GL

The affix will come after a word in the 3rd case in construction when it means 'price,' and the force of the 3rd case is that of 'instrument' (II. 3. 18) and not that of 'agent.' Therefore, there is no affixing in the words देवदत्तेन क्रीतं or पाणिना क्रीतं ॥

Nor does the affix come after a dual or a plural. Thus प्रस्थाभ्यां क्रीतं or प्रस्थैः क्रीतं, there is no affixing, as it is not the idiom. But द्वाभ्यां क्रीतं = द्विकम्, त्रिकम्, पंचकम्, मुद्गैः क्रीतं = मौद्गिकम्, माषिकम्. Here there is affixing after a dual and plural, for the words द्वि, त्रि are essentially dual or plural, and in the case of मुद्गः and माषः, those are always used in the plural, for it is not possible to purchase anything with a single grain of मुद्ग or माषः ॥

तस्य निमित्तं संयोगोत्पातौ ॥ ३८ ॥ पदानि ॥ तस्य, निमित्तम्, संयोग-उत्पातौ ॥

वृत्तिः ॥ तस्येति षष्ठीसमर्थान्निमित्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यत्तन्निमित्तं संयोगश्चेत्स भवति उत्पातो वा ॥

वार्त्तिकम् ॥ तस्यनिमित्तप्रकरणे वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम् ॥
वा० ॥ सन्निपाताच्चेति वक्तव्यम् ॥

38. The above affixes have further the sense of "for its sake", when the meaning is a relation or an unwonted appearance.

The word तस्य shows that the word in construction must be in the 6th case, the word निमित्त 'cause or occasion' gives the sense of the affix; संयोग means 'a connection, or relation': उत्पातः means 'a portend indicative of good or bad luck.' Thus शतस्य निमित्तं धनपतिना संयोगः = शत्यः 'a connection with a rich man for the sake of getting a hundred.' So also शतिकः, साहस्रः ॥ So also शतस्य निमित्तमुत्पातो दक्षिणाक्षिस्पन्दनम् = शत्यम्, शतिकम्, साहस्रम् "the twitching of the right eye for the sake of a hundred" i. e. indicative of acquiring or losing a hundred, a thousand &c.

Vârt :—The above affixes come after the words वात, पित्त, and श्लेष्म in the senses of allaying or vitiating. As वातिकम् 'allaying or vitiation of windy humour.' So also पैत्तिकम्, श्लैष्मिकम् ॥

Vârt :—Also after the word सन्निपात, as, सान्निपातिकम् ॥

गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् ॥ ३९ ॥ पदानि ॥ गो-द्व्यचोः, अ-संख्या-परिमाण-अश्वादेः, यत् ॥

वृत्तिः ॥ गोशब्दाद् द्व्यचश्च प्रातिपदिकात्संख्यापरिमाणाश्वादिविवर्जिताद्यत् प्रत्ययो भवति तस्य निमित्तं संयोगोत्पाताविवत्येतस्मिन्नर्थे । ठञादीनामपवादः ॥

वार्त्तिकम् ॥ ब्रह्मवर्चसादुपसंख्यानम् ॥

39. After the word गो and after a word having two syllables, with the exception of a Numeral, or a Measure of

MINISTRY OF CULTURE · GOVERNMENT OF INDIA

GSL

capacity, or aśva &c, the affix yat (य) is added, in the above sense of 'a relation or a portent for the purpose of that'.

This debars ढञ्. As गो निमित्तं संयोग उत्पातो वा = गव्यः 'a connection or a portent for the sake of a cow.' So also after a word of two syllables, as, धैन्यम्, स्वर्ग्यम्, यशस्यम्, आयुष्यम् ॥

Why do we say "when not a word denoting a Numeral, or a Measure of capacity or अश्व &c"? Observe पंचानां निमित्तं = पंचकम्, सप्तकम्, अष्टकम्; प्रास्थिकम् खारिकम्, आश्विकः formed by V. 1. 22, 18, 19.

Vârt:—The word ब्रह्मवर्चस should be enumerated: e. g. ब्रह्मवर्चसस्य निमित्तं गुरुणा संयोगः = ब्रह्मवर्चस्यम् "relationship with a teacher in order to acquire Brahmavarchasa."

1 अश्व, 2 अश्मन्, 3 गण, 4 ऊर्णा, 5 उमा, 6 गङ्गा (भङ्ग भङ्गा), 7 वर्षा (वर्ष), 8 वसु. ॥

पुत्राच्छ च ॥ ४० ॥ पदानि ॥ पुत्रात्, छ, च ॥

वृत्तिः ॥ पुत्रशब्दाच्छः प्रत्ययो भवति चकाराद्यच तस्य निमित्तं संयोगोत्पाताविव्येतस्मिन्विषये ॥

40. After the word putra, the affix chha (ईय) also comes, as well as yat (य), in the above sense of 'a relation or a portent for the purpose of that.'

The word पुत्र being a dissyllabic word would always have taken यत् by the last aphorism. This ordains छ also. Thus पुत्रस्य निमित्तं संयोग उत्पातो वा = पुत्रीयम् or पुत्र्यम् ॥

सर्वभूमिपृथिवीभ्यामणञौ ॥ ४१ ॥ पदानि ॥ सर्वभूमि-पृथिवीभ्याम, अण्-अञौ ॥

वृत्तिः ॥ सर्वभूमिपृथिवीशब्दाभ्यां यथासंख्यमणञौ प्रत्ययौ भवतः, तस्य निमित्तं संयोगोत्पाताविव्येतस्मिन्विषये । ठकोपवादौ ॥

41. The affixes aṇ (±—अ) and añ (±/—अ) are respectively added to the words sarvabhûmi and pṛithivî, in the above mentioned sense of "a connection or a portent for its purpose".

This debars ठक्. Thus सर्वभूमेर्निमित्तं संयाग उत्पातो वा = सार्वभौमः, so also पार्थिवः॥ In सार्वभौमः there is Vṛiddhi of both members of the compound by VII. 3. 20.

तस्येश्वरः ॥ ४२ ॥ पदानि ॥ तस्य, ईश्वरः ॥

वृत्तिः ॥ तस्येति षष्ठीसमर्थाभ्यां सर्वभूमिपृथिवीशब्दाभ्यामणञौ प्रत्ययौ भवत ईश्वर इत्येतस्मिन्विषये ।

42. To the same bases sarvabhûmi and pṛithivî, are added the same affixes aṇ and añ respectively, in the sense of "lord thereof".

Thus सर्वभूमेरीश्वरः = सार्वभौमः 'the lord of the whole earth', पार्थिवः 'the lord of the earth'.

MINISTRY OF CULTURE · GOVERNMENT OF INDIA

CSL

The word तस्य, showing the genitive construction of the base, has been repeated in this sûtra, though its anuvṛitti was running into it from V. I. 38; in order to show that the senses given in V. I. 38 do not extend further. Had तस्य not been repeated here, the word ईश्वरः would have been an attribute, like the words संयोग and उत्पात, of the word निमित्तः ॥

तत्र विदित इति च ॥ ४३ ॥ पदानि ॥ तत्र-विदितः-इति-च (अण्-अञौ) ॥

वृत्तिः ॥ तत्रेति सप्तमीसमर्थाभ्यां सर्वभूमिपृथिवीशब्दाभ्यां यथासंख्यमणञौ प्रत्ययौ भवतः, विदित इत्येतस्मिन्नर्थे ।

43. To the same bases sarvabhûmi and pṛithivî, being in the 7th case in construction, are added the same affixes aṇ and añ respectively, when the sense is that of "known therein".

The word विदितः means known published &c. सर्वभूमौ विदितः = सार्वभौमः known in the whole world. So also पार्थिवः ॥

लोकसर्वलोकाट्ठञ् ॥ ४४ ॥ पदानि ॥ लोक-सर्वलोकात्, ठञ् ॥

वृत्तिः ॥ लोकसर्वलोकशब्दाभ्यां तत्रेति सप्तमीसमर्थाभ्यां विदित इत्येतस्मिन्विषये ठञ् प्रत्ययो भवति ।

44 The affix ṭhañ (+/—इक) comes in the sense of 'known therein', after the words loka and sarvaloka, in the 7th case in construction.

Thus लोके विदितः = लौकिकः, सार्वलौकिकः ॥ The irregular Vṛiddhi of both members takes place by VII. 3. 20.

तस्य वापः ॥ ४५ ॥ पदानि ॥ तस्य-वापः ॥

वृत्तिः ॥ तस्येति सप्तमीसमर्थाद्वाप इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति ।

45. The above mentioned affixes (V. 1. 18 &c) come after a word in the sixth case in construction, in the sense of 'sown with so much'.

The word वापः means 'sown therein' i. e. a field. Thus प्रस्थस्य वापः क्षेत्रं = प्रास्थिकम् 'sown with a Prastha', द्रौणिकम्, खारीकम्, i. e. a field sown with a quantity of grain measuring a Prastha or a Droṇa or a Khârî.

पात्रात्ष्ठन् ॥ ४६ ॥ पदानि ॥ पात्रात्-ष्ठन् ॥

वृत्तिः ॥ पात्रशब्दात् ष्ठन् प्रत्ययो भवति तस्य वाप इत्येतस्मिन्विषये । ठञोऽपवादः ।

46. The affix shṭhan (/—इक) comes in the sense of 'sown with so much', after the word pâtra.

This debars ठञ्. The न् of ष्ठन् is for accent (VI. I. 197), the ष् is for ङीष् (IV. I. 41). The word पात्र denotes a measure of capacity. Thus पात्रस्य वापः = पात्रिकं क्षेत्रम्, fem पात्रिकी क्षेत्रभक्तिः ॥

MINISTRY OF CULTURE · GOVERNMENT OF INDIA · सत्यमेव जयते · संस्कृति मंत्रालय · भारत सरकार

GSL

तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते ॥ ४७ ॥ पदानि ॥ तद्, अस्मिन्, वृद्धि-आय-लाभ-शुल्क-उपदा, दीयते ॥

वृत्तिः ॥ तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमासमर्थं वृद्ध्यादि चेत्तद्दीयते ।

वार्त्तिकम् ॥ चतुर्थ्यर्थउपसंख्यानम् ॥

47. The above mentioned affixes have also the sense of "an interest, or a rent, or a profit, or a tax, or a bribe given thereby or in that".

The affix is added to a word in the first case (तद्) in construction. The sense of the affix is that of a locative (अस्मिन्). The word दीयते 'is given' in the singular number joins with each one of the word वृद्धि, आय &c. The sum paid by a debtor to his creditor over and above the principal, is called वृद्धि or interest. The share of profit taken by landlord in villages &c. is called आय or rent. The increase over the capital by sale of cloth &c. is called लाभ or profit. The share of the king for protection &c. is called शुल्क or tax. The present or bribe is called उपदा ॥ Thus पंचास्मिन् वृद्धि र्वा आयो वा लाभो वा शुल्को वा उपदा वा दीयते = पंचकः 'that transaction &c. in which five per cent is given as interest, rent, profit, tax or bribe'. Similarly सप्तकः, शत्यः, शतिकः, साहस्रः &c.

Vârt:—So also in the sense of a Dative. As पंचास्मै वृद्धिर्वा आयो वा लाभो वा उपदा वा दीयते = पंचको देवदत्तः "Devadatta to whom five per cent is given as Interest &c". This Vârtika may be redundant, if we take the locative as sometimes having the force of dative also. As in the sentence सप्तम्ब्राह्मणे दानं ॥

पूरणार्द्धाट्ठन् ॥ ४८ ॥ पदानि ॥ पूरण, अर्द्धात्, ठन् ॥

वृत्तिः ॥ पूरणवाचिनः शब्दादर्द्धशब्दाच्च ठन् प्रत्ययो भवति तदस्मिन्वृद्ध्यायलाभशुल्कोपदादीयतइत्येतस्मिन्नर्थे । यथायथं ठक्टिठनोरपवादः ।

48. The affix than (ठ्—इक) comes in the same sense of "an interest, a rent, a profit, a tax or a bribe given thereby or therein", after a word denoting an ordinal, and after the word ardha.

This debars ठक् and टिठन् ॥ Thus द्वितीयो वृद्ध्यादिरस्मिन् दीयते = द्वितीयिकः, तृतीयिकः, पंचमिकः, सप्तमिकः, अर्द्धिकः ॥ The word अर्द्ध is technically the name of रूपकार्ध ।

भागाद्यच्च ॥ ४९ ॥ पदानि ॥ भागात्, यत्, च ॥

वृत्तिः ॥ भागशब्दाद्यत् प्रत्ययो भवति । चकाराट्ठंश्च । तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयतइत्येतस्मिन्नर्थे ।

49. The affix yat (य) comes after the word bhâga in the sense of "an interest, a rent, a profit, a tax or a bribe given thereby or therein".

MINISTRY OF CULTURE · GOVERNMENT OF INDIA

GSL

By the word च in the sûtra ठन् also comes. This debars ठञ् ॥ Thus भागो वृद्ध्यादिरस्मिन् दीयते = भाग्यं or भागिकं शतम् ; भाग्या or भागिका विंशतिः ॥ The word भाग also denotes रूपकार्ध ॥

तद्धरति वहत्यावहति भाराद्वंशादिभ्यः ॥ ५० ॥ पदानि ॥ तत्, हरति, वहति, आवहति, भारात्, वंशादिभ्यः ॥

वृत्तिः ॥ तदिति द्वितीयासमर्थाद्धरत्यादिष्वर्थेषु यथाविहितं प्रत्ययो भवति ।

50. The above mentioned affixes, after the word भार preceded by the word वंश &c, have the sense of 'who carries away, or conveys or brings that'.

The case in construction here is accusative (तद्). Thus वंशभारं हरति, वहति आवहति वा = वांशभारिकः, कौटजभारिकः, बाल्बजभारिकः ॥

Why do we say "after भार"? Observe वंशं हरति, no affixing. Why do we say "preceded by वंश &c". Observe व्रीहिभारं हरति, no affixing.

According to another explanation, the phrase भाराद् वंशादिभ्यः is explained as भारभूतेभ्यो वंशादिभ्यः. Then the sûtra will mean "the above named affixes come after वंश &c. when they denote a load". Thus भारभूतान् वंशान् हरति = वांशिकः, कौटजिकः, बाल्बजिकः ॥ Why do we say "when denoting a load भार"? Observe वंशं हरति ॥ Why do we say after वंश &c.? Observe भारभूतान् व्रीहीन् वहति ॥ Both these explanations are valid and traditional.

The word हरति means to carry to another place or to steal; वहति means to carry on ones back or head, आवहति means to produce or bring.

1 वंश, 2 कुटज, 3 बल्वज, 4 मूल, 5 स्थुणा, (स्थुण), 6 अक्ष, 7 अश्मन्, 8 अश्व, 9 लक्षण*, 10 इक्षु, 11 खट्वा ॥

वस्नद्रव्याभ्यां ठन्कनौ ॥ ५१ ॥ पदानि ॥ वस्न-द्रव्याभ्याम्, ठन्, कनौ ॥

